|| श्री महागणपतये नमः ||
Indian Astrology Source
www.astrovidya.com

## आदित्य हृदयम्>

ततो युद्ध परिश्रांतं समरे चिंतया स्थितं। रावणं चाग्रतो दृष्ट्वा युद्धाय समुपस्थितं॥1|| दैवतैश्च समागम्य द्रष्टुमभ्यागतो रणं। उपागम्याब्रवीद्रामम् अगस्त्यो भगवान् ऋषिः॥2|| राम राम महाबाहो शृणु गुह्यं सनातनं। येन सर्वानरीन् वत्स समरे विजयिष्यसि॥3|| आदित्य हृदयं पुण्यं सर्वशत्रुविनाशनं। जयावहं जपेन्नित्यं अक्षयं परमं शिवं॥4|| सर्वमंगलमांगल्यं सर्वपापप्रणाशनं। चिंताशोकप्रशमनं आयुर्वधनमुत्तमं॥5|| रश्मिमंतं समुद्यंतं देवासुरनमस्कृतं। पूजयस्व विवस्वंतं भास्करं भुवनेश्वरं॥6|| सर्वदेवात्मको हयेष तेजस्वी रश्मिभावनः। एष देवासुरगणान् लोकान् पाति गभस्तिभिः॥7|| एष ब्रह्मा च विष्णुश्च शिवः स्कंदः प्रजापतिः। महेंद्रो धनदः कालो यमः सोमो हयपांपतिः॥8|| पितरो वसवः साध्या हयश्विनौ मरुतो मनुः। वायुर्वह्निः प्राजाप्राण ऋतुकर्ता प्रभाकरः॥9|| आदित्यः सविता सूर्यः खगः पूषा गभस्तिमान्। सुवर्णसदृशो भानुः स्वर्णरेता दिवाकरः॥10|| हरिदश्वः सरस्रार्चिः सुप्तसप्तिर्मरीचिमान्। तिमिरोन्मथनः शंभुः त्वष्टा मार्तांड अंशुमान्॥11|| हिरण्यगर्भः शिशिरः तपनो भास्करो रविः। अग्निगर्भोदितेः पुत्र शंखः शिशिरनाशनः॥12|| व्योमनाधस्तमोभेदी ऋग्यजुःसामपारगः। घनवृष्टिरपांमित्रो विंध्यवीथीप्लवंगमः॥13|| आतपी मंडली मृत्युः पिंगलः सर्वतापनः। कविर्विश्वो महातेजा रक्तः सर्वभवोद्भवः॥14|| नक्षत्रग्रहताराणां अदिपो विश्वभावनः। तेजसामपि तेजस्वी द्वादशात्मन् नमोस्तुते॥15|| नमः पूर्वाय गिरये पश्चिमायाद्रये नमः। ज्योतिर्गणानां पतये दिनाधिपतये नमः॥16|| जयाय जयभद्राय हर्यश्वाय नमो नमः। नमो नमः सहस्रांशो आदित्याय नमो नमः॥17|| नमः उग्राय वीराय सारंगाय नमो नमः। नमः पद्मप्रबोधाय मार्तांडाय नमो नमः॥18|| ब्रह्मेशानाच्युतेशाय सूर्यायादित्यवर्चसे। भास्वते सर्वभक्षाय रौद्राय वपुषे नमः॥19|| तमोघ्नाय हिमघ्नाय शत्रुघ्नायामितात्मने। कृतघ्नघ्नाय देवाय ज्योतिषांपतये नमः॥20|| तप्तचामीकराभाय वह्नये विश्वकर्मणे। नमस्तमोभिनिघ्नाय रुचये लोकसाक्षिणे॥21|| नाशयत्येष वै भूतं तदेव सृजति पभुः। पायत्येष तपत्येष वर्षत्येष गभस्तिभिः॥22|| एष सुप्तेषु जागर्ति भूतेषु परिनिष्ठितः। एष एवाग्नि होत्रं च फलं चैवाग्निहोत्रिणां॥23|| वेदाश्च क्रतवश्चैव क्रतूनां फलमेव च। यानि कृत्यानि लोकेषु सर्व एष रविः प्रभुः॥24|| एनमापत्सु कृच्छ्रेषु कांतारेषु भयेषु च। कीर्तयन् पुरुषः कश्चित् नावसीदति राघव॥25|| पूजयस्वैनमेकाग्रो देवदेवं जगत्वतिं। एतत् त्रिगुणितं जप्त्वा युद्धेषु विजयिष्यसि॥26|| अस्मिन् क्षणे महाबाहो रावणं त्वं वधिष्यसि।

एवमुक्त्वा ततोगस्त्यो जगाम च यथागतं॥27|| एतच्छ्रुत्वा महातेजा नष्टशोकोभवत्तदा।
धारयामास सुप्रीतो राघवः प्रयतात्मवान्॥28|| आदित्यं प्रेक्ष्य जप्त्वातु परं हर्षमवाप्तवान्।
त्रिराचम्य शुचिर्भूत्वा धनुरादाय वीर्यवान्॥29|| रावणं प्रेक्ष्य हृष्टात्मा युद्धाय समुपागतं। सर्वयत्नेन
महता वधे तस्य धृतोभवत्॥30|| अथ रविरवदन्निरीक्ष्य रामं मुदितमनाः परमं प्रहृष्यमाणः।
निशिचरपतिसंक्षयं विदित्वा सुरगणमध्यगतो वचस्त्वरेति॥31|| इति श्रीमद्रामायणे युद्धकांडे
आदित्यहृदयं नाम्न सप्तोत्तर शततमः सर्गः॥

Click here to go back

For Qualitative Predictions & Potential Remedies visit:
www.astrovidya.com